६ पन्नानी

ऋतुसंहारः

३७८

ऋतुसंहार काव्य

वल्लकीकाकलिगीतनिःस्वनैर्विबोध्यतेसुप्तइवाद्यमन्मथः॥ ८ असह्यवातोद्धतरेणुमंडलाप्रचंड
सूर्यातपतापितामही॥नशक्यतेद्रष्टुमपिप्रवासिभिःप्रियावियोगानलदग्धमानसैः ९ मृगाःप्र
चंडातपतापिताभृशंतृषामहत्यापरिशुष्कतालवः॥वनांतरेतोयमितिप्रधाविनोनिरीक्ष्यभिन्नांज
नसन्निभंनभः १० सविभ्रमैःसस्मितजिह्मवीक्षितैर्विलासवत्योमनसिप्रसंगिणां॥अनंगसंदीप
नमाशुकुर्वतेयथाप्रदोषाःशशिचारुभूषणाः ११ रवेर्मयूखैरभितापितोभृशंविदह्यमानः
पथितप्तपांसुभिः॥अवाङ्मुखोजिह्मगतिःश्वसन्मुहुःफणीमयूरस्यतलेनिषीदति १२ तृषाम
हत्याहतविक्रमोद्यमःश्वसन्मुहुर्दूरविदारिताननः॥नहंत्यदूरेपिगजान्मृगेश्वरोविलोलजिह्वः
श्चलिताग्रकेसरः १३ विशुष्ककंठाहृतसीकरांभसोगभस्तिभिर्भानुमतोनुतापिताः॥प्रवृद्धतृष्णो
पहताजलार्थिनोनदंतिनःकेसरिणोपिबिभ्यति १४ हुताग्निकल्पैःसवितुर्गभस्तिभिःकला
पिनःक्लांतशरीरचेतसः॥नभोगिनंघ्नंतिसमीपवर्तिनंकलापचक्रेषुनिवेशिताननं १५ सभद्रमुस्तं

रविप्रभोद्भिन्नशिरोमणिप्रभो विलोलजिह्वाद्वयलीढमारुतः ॥ विषाग्निसूर्यातप[illegible]फणी न हन्ति मंडू
पाउ
ऋ० व० परिशुष्ककर्दमं सरः खनन्नायतपोत्रमंडलः रवेर्मयूखैरभितापितो भृशं वराहयूथो विशतीह भूतलं
२ १६ विवस्वतातीव्रतरांशुमालिना सपंककतोयात्सरसोभितापितः उत्पत्य भेकस्तृषितस्य भो
गिनः फणातपत्रस्य तले निषीदति १७ समुद्धृताशेषमृणालजालकं विपन्नमीनं द्रुतभीतसारसं
कुलम् ॥ परस्परोत्पीडनसंहतैर्गजैः कृतं सरः सान्द्रविमर्दकर्दमं १८ सफेनलालावृतवक्त्रसंपु
ट विनिर्गतालोहितजिह्वमुन्मुखं ॥ तृषाकुलं निःसृतमद्रिगह्वरादवेक्षमाणं महिषीकुलं ज
लं २० पटुतरवनदाहाच्छुष्कशष्पप्ररोहाः परुषपवनवेगोत्क्षिप्तसंशुष्कपर्णाः ॥ दिनकरपरि
तापक्षीणतोयाः समन्ताद्विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः २१ श्वसिति विहगवर्गः शीर्णप
र्णद्रुमस्थः कपिकुलमुपयाति क्लान्तमद्रेर्निकुंजं भ्रमति गवययूथः सर्वतस्तोयमिच्छन् शर
भकुलमजिह्मं प्रोद्धरत्यम्बु कूपात् २२ विकचनवकुसुम्भस्वच्छसिंदूरभासा प्रबलपवनवेगोद्धू राम
तधूमेन तूर्णं तरुविटपलताग्रालिंगनव्याकुलेन दिशि दिशि परिदग्धा भूमयः पावकेन २३ ध्व २

लतिपवनवृद्धःपर्वतानांदरीषुस्फुरतिपटुनिनादैःशुष्कवंशस्थलीषुप्रसरतितृणमध्येलब्धवृद्धिः
क्षणेनग्लपयतिमृगवर्गंप्रांतलग्नोदवाग्निः २४ बहुतरइवजातःशाल्मलीनांवनेषुस्फुरतिक
मलगौरःकोटरेषुद्रुमाणां॥परिणतदलशाखादुत्पतत्प्रांशुवृक्षाद्भ्रमतिपवनधूतःसर्वतोग्नि
र्वनांते २५ गजगवयमृगेंद्रावह्निसंतप्तदेहाःसुहृदइवसमेताद्वंद्वभावंविहायाहुतवह
परिखेदादाशुनिर्गत्यकक्षाद्विपुलपुलिनदेशान्निम्नगांसंविशंति २६ कमलवनसितांबुःपा
टलामोदरम्यःसुखसलिलनिषेकःसेव्यचंद्रांशुहारः॥भवतुतवनिदाघःकामिनीभिःसमेतोनि
शिसुललितगीतेहर्म्यपृष्ठेसुखेन २७ इतिश्रीकालिदासकृतावृतुसंहारेग्रीष्मवर्णनंना
मप्रथमःसर्गः सशीकरांभोधरमत्तकुंजरस्तडित्पताकोशनिशब्दमर्दलः॥समागतोराजवदु
द्धतद्युतिर्घनागमःकामिजनप्रियःप्रिये १ नितांतनीलोत्पलपत्रकांतिभिःक्वचित्प्रभिन्नांजन
राशिसन्निभैः॥क्वचित्सगर्भप्रमदास्तनप्रभैःसमाचितंव्योमघनैःसमंततः २ तृषाकुलैश्चात

ऋ॥ वः कपङ्क्तिणां कुलैः प्रयाचिता स्तोयभरावलंबिनः॥ प्रयांति मंदं बहुधारवर्षिणो बलाहकाः श्रोत्रमनोह
३ रस्वनं ३ बलाहकाश्चाशनिशब्दमर्द्दलाः सुरेंद्रचापं दधतस्तडिद्गुणं॥ सुतीक्ष्णधारापतनोग्रसा
यकैस्तुदंति चेतः प्रसभं प्रवासिनाम् ४ प्रभिन्नवैडूर्यनिभैस्तृणांकुरैः समाचिता प्रोत्थितकंद
लीदलैः॥ विभाति शुक्लेतररत्नभूषिता वरांगनेव क्षितिरिंद्रगोपकैः ५ सदा मनोज्ञं स्वनदुत्सवो
त्सुकं विकीर्णविस्तीर्णकलापशोभितं॥ ससंभ्रमालिंगनचुंबनाकुलं प्रवृत्तनृत्यं कुलमद्य बर्हि
णां ६ निपातयंत्यः परितस्तटद्रुमान्प्रवृद्धवेगैः सलिलैरनिर्मलैः॥ स्त्रियः सुदुष्टा इव जातविभ्र
माः प्रयांति नद्यस्त्वरितं पयोनिधिं ७ तृणोत्करैरुद्गतकोमलांकुरैर्विचित्रनीलैर्हरिणीमुख
क्षतैः। वनानि वैंध्यानि हरंति मानसं विभूषितान्युद्गतपल्लवैर्द्रुमैः ८ विलोलनेत्रोत्पलशो
भिताननैर्मृगैः समंतादुपजातसाध्वसैः॥ समाचिता सैकतिनी वनस्थली समुत्सुकत्वं प्रक राम
रोति चेतसां ९ अभीक्ष्णमुच्चैर्ध्वनता पयोमुचा घनांधकारीकृतशर्वरीष्वपि॥ तडित्प्रभादर्शित ३

नवपुष्पैर्यूथिकाकुड्मलैश्च ॥ विकचनवकदंबैः कर्णपूरं वधूनां रचयति जलदौघः कान्तवत्का
ल एषः २४ दधति वरकुचाग्रैरुन्नतैर्हारयष्टिं प्रतनुसितदुकूलान्यायतैः श्रोणिबिंबैः ॥ नवजल
कणसेकादुद्गतां रोमराजिं ललितवलिविभंगैर्मध्यदेशैश्च नार्यः २५ तनुजलकणसेकाच्छी
ततामादधानः कुसुमभरनतानां लासकः पादपानां ॥ जनितरुचिरगंधः केतकीनां रजोभिः परि
हरति नभस्वान्प्रोषितानां मनांसि २६ जलभरविनतानामाश्रयोस्माकमुच्चैरयमिति जल
सेकैस्तोयदास्तोयनम्राः ॥ अतिशयपरुषाभिर्ग्रीष्मवह्नेः शिखाभिः समुपजनिततापं ह्लाद
यंतीव विंध्यं २७ बहुगुणरमणीयः कामिनीचित्तहारी तरुविटपलतानां बांधवो निर्विका
रः ॥ जलदसमय एषः प्राणिनां प्राणभूतो दिशतु तव हितानि प्रायशो वाञ्छितानि २८ इति
श्रीकालिदासकृतौ ऋतुसंहारे प्रावृड्वर्णनं नाम द्वितीयः सर्गः काशांशुका विकचपद्म
मनोज्ञवक्त्रा सोन्मादहंसनवनूपुरनादरम्या ॥ आपक्वशालिरचिता तनुगात्रयष्टिः प्राप्ता शरत्

ग्रा॰च ५ नववधूरिव रूपरम्या १ काशैर्मही शिशिरदीधितिना रजन्यो हंसैर्जलानि सरितां कुमुदैः सरां
सि ॥ सप्तच्छदैः कुसुमभारनतैर्वनान्ताः शुक्लीकृतान्युपवनानि च मालतीभिः ॥ २ व्योमक्वचि
द्रजतशंखमृणालगौरैस्त्यक्ताम्बुभिर्लघुतया शतशः प्रयातैः । संलक्ष्यते पवनवेगचलैः पयोदै
राजेव चामरवरैरुपवीज्यमानः ३ भिन्नाञ्जनप्रचयकान्ति नभो मनोज्ञं बन्धूकपुष्परचितारुणि
ता च भूमिः । वप्राश्च चारुकमलावृतभूमिभागाः प्रोत्कण्ठयन्ति न मनो भुवि कस्य यूनः ४ मन्दा
निलाकुलितचारुमनोज्ञशाखः पुष्पोद्गमः प्रचलकोमलपल्लवाग्रः । मत्तद्विरेफपरिपीतरसप्र
सेकश्चित्तं विदारयति कस्य न कोविदारः ५ तारागणप्रवरभूषणमुद्वहन्ती मेघोपरोधपरिमु
क्तशशाङ्कवक्त्रा । ज्योत्स्नादुकूलममलं रजनी दधाना वृद्धिं प्रयात्यनुदिनं प्रमदेव बाला ६ का
रण्डवैरभिविघट्टितवीचिमालाः कादम्बसारसकुलाकुलनीरदेशाः । कुर्वन्ति हंसविरुतैः परि राम
तो जनस्य प्रीतिं सरोरुहरजोरुणितास्तटिन्यः ७ नेत्रोत्सवो हृदयहारिमरीचिमालः प्रह्लादकः शि ५

प्रलीनकादंबविवर्जितानि॥प्रशान्ततोयानिसुशीतलानिसरांसिचेतांसिहरंतिपुंसाम् ९ पाकं
व्रजंतीहिमशीतलानिलैराधूयमानासततंमरुद्भिः॥प्रियेप्रियंगुःप्रियविप्रयुक्ताविपांडुतांयाति
विलासिनीव १० सुरासवामोदसुगंधिवक्त्रोनिश्वासवातैःसुरभीकृतांगः॥परस्परांगंव्यतिरि
क्तशायीशेतेजनःकामरसानुविद्धः॥ ११ दंतच्छदैःसव्रणदंतचिह्नैःस्तनैश्चपाण्यग्रकृताभि
लेखैः॥संसूच्यतेनिर्दयमंगनानांरतोपभोगोनवयौवनानां १२ काचिद्विभूषयतिदर्पण
सक्तहस्ताबालातपेष्ववनितावदनारविंदं॥दंतच्छदंप्रियतमेननिपीतसारंदंताग्रभिन्नमपकृ
ष्यनिरीक्षतेऽन्या १३ अन्याप्रकामसुरतश्रमखिन्नदेहानक्तंप्रजागरविपाटलनेत्रयुग्मा॥स्कंध
प्रदेशलुलितालककेशपाशानिद्रांप्रयातिमृदुसूर्यकराभितप्ता १४ निर्माल्यदामपरिभुक्तम
नोज्ञगंधंमूर्ध्नोपनीयघननीलशिरोरुहांताः॥पीनोन्नतस्तनभरानतगात्रयष्ट्यःकुर्वंतिकेशरच
नामबलास्तरुण्यः १५ अन्याप्रियेणपरिभुक्तमवेक्ष्यगात्रंहर्षान्वितावरचिताधररागशोभा॥कूर्प

ऋ॰वा शुकंपरिदधातिनचननागीव्यालंविनीविलुलितालककुंचिताग्रा। १६ अन्यास्थिरंसुरतकेलिपरिश्र
८ मणेरवेदंगताःसुशिथिलीकृतगात्रयष्ट्यः।संघृष्यमाणविपुलोरुपयोधरार्ताअभ्यंजनंविदधतिप्र
मदाःसुशोभम् १७ बहुगुणरमणीयोयोषितांचित्तहारीपरिणतबहुशालिव्याकुलग्रामसीमा।।
सततमतिमनोज्ञःक्रौंचमालापरीतःप्रदिशतुहिमयुक्तोहेमकालःसुखंव १८ इतिश्रीकालि
8 दासकृतावृतुसंहारेहेमंतवर्णनंनामचतुर्थःसर्गः प्ररूढशालीक्षुचयावृभहितिकचित्स्थि
तक्रौंचनिनादशोभितम्।प्रकामकामप्रमदाजनप्रियंवरोरुकालंशिशिराह्वयंशृणु १ निरु
द्धवातायनमंदिरोदरंहुताशनोभानुमतोगभस्तयः।गुरूणिवासांस्यबलाःसयौवनाःप्रयांतिका
लेत्रजनस्यसेव्यताम् २ नचंदनंचंद्रमरीचिशीतलंनहर्म्यपृष्ठंशारदेंदुनिर्मलम्।नायवःसांद्रतु
षारशीतलाजनस्यचित्तंरमयंतिसांप्रतम् ३ तुषारसंघातनिपातशीतलाःशशांकभाभिःशिशि राम
रीकृताःपुनः।विपांडुताराणजिह्मभूषिताजनस्यसेव्यानभवंतिरात्रयः ४ गृहीततांबूलविले ८

समुपागतःप्रिये १ द्रुमाःसपुष्पाःसलिलंसपद्मंस्त्रियःसकामाःपवनःसुगंधिः।सुखाःप्रदो
षादिवसाश्चरम्याःसर्वंप्रियेचारुतरंवसंते २ वापीजलानांमणिमेखलानांशशांकभा
सांप्रमदाजनानाम्॥चूतद्रुमाणांकुसमान्वितानांददातिसौभाग्यमयंवसंतः ३ कुसुंभ
रागारुणितैर्दुकूलैर्नितंबबिंबानिविलासिनीनाम्॥रक्तांशुकैःकुंकुमरागगौरैरलंक्रियं
तेस्तनमंडलानि ४ कर्णेषुयोग्यंनवकर्णिकारंचलेषुनीलेष्वलकेष्वशोकः॥शिखासुफु
ल्लानवमालिकाश्चप्रयांतिकांतिंप्रमदाजनस्य ५ स्तनेषुहाराःसितचंदनार्द्राभुजेषुसं
गंवलयांगदानि॥प्रयांतिनिःसंगमनंगसौख्यांनितंबिनीनांजघनेषुकांच्यः ६ सपत्रले
खेषुविलासिनीनांवक्त्रेषुहेमांबुरुहोपमेषु॥कर्णांतरेमौक्तिकसंगजातःस्वेदागमोवि
स्तरतामुपैति ७ उच्छ्वासयंत्यःश्लथबंधनानिगात्राणिकंदर्पसमाकुलानि॥समीपवर्ति
ष्वपिकामुकेषुसमुत्सुकाएवभवंतिनार्यः ८ तनूनिपांडूनिसुमंथराणिमुहुर्मुहुर्जृंभ

ऋव
१०

णातत्पराणि। अंगान्यनंगः प्रमदाजनस्य करोति लावण्यससंभ्रमाणि ९ नेत्रेषु लोलो म
दिरालसेषु गंडेषु पांडुः कठिनः स्तनेषु। मध्येषु निम्नो जघनेषु पीनः स्त्रीणामनंगो बहुधा स्थितो
द्य १० अंगानि निद्रालसविह्वलानि वाक्यानि किंचिन्मदिरालसानि। भ्रूक्षेपजिह्मानि च वीक्षि
तानि चकार कामः प्रमदाजनस्य ११ प्रियंगुकालीयककुंकुमानि स्तनांगभागेषु विचर्चिता
नि। आलिप्यते चंदनमंगनाभिर्मदालसाभिर्मृगनाभियुक्तम् १२ गुरूणि वासांसि विहाय तू
र्णं तनूनि लाक्षारसरंजितानि। सुगंधिकालागुरुधूपितानि धत्ते जनः काममदालसांगः १३ पुं
स्कोकिलश्चूतद्रुमाः पुष्पितचारुशारसासवेन मत्तः प्रियां चुंबति कामहृष्टः। गुंजन्द्विरेफोऽप्ययमंबु
ना हि हिं प्रियायाः प्रकारोति चाटु १४ ताम्रपवालास्तबकावनम्राश्चूतद्रुमाः पुष्पितचारुशाखाः
कुर्वंति कांतं पवनावधूताः पर्युत्सुकं मानसमंगनानाम् १५ आमूलतो विद्रुमरागताम्राः सपल्ल राम
वाः पुष्पचयं दधानाः। कुर्वंत्यशोका हृदयं सशोकं निरीक्ष्यमाणा नवयौवनानाम् १६ मत्तद्विरे १०

10

कपरिचुंबितचारुपुष्पामंदानिलाकुलितताम्रमृदुप्रवालाः॥ कुर्वंति कामिमनसां सहसोत्सुकत्वं बा
ताविमुक्तकलिकासमवेक्ष्यमाणाः १७ कांतामुखद्युतिमनोहरमुद्गतानां शोभांपरांकुरब
कद्रुममंजरीणाम्॥ दृष्ट्वाप्रियेसहृदयस्यभवेन्नकस्य कंदर्पबाणपतनव्यथितंहिचेतः॥
१८ आदीप्तवह्निसदृशैर्मरुतावधूतैः सर्वत्रकिंशुकवनैःकुसुमावनम्रैः॥ सद्योवसंतसम
येनमाचितेयं रक्तांशुकानववधूरिवभातिभूमिः १९ किंकिंशुकैःशुकमुखच्छविभिर्नद
ग्धं किंकर्णिकारकुसुमैर्नकृतंनुनाद्य यत्कोकिलःपुनरयंमधुरैर्वचोभिर्यूनांमनःसुवदनानि
हितंनिहंति २० पुंस्कोकिलैःकलवचोभिरुपात्तहर्षैःकूजद्भिरुन्मदकलानिवचांसिभृंगैः॥ ल
ज्जान्वितंसविनयंहृदयंक्षणेनपर्याकुलंकुलगृहेपिकृतंवधूनाम् २१ आकंपयन्कुसुमिताःसहका
रशाखाविस्तारयन्परभृतस्यवचांसिदिक्षु॥ वायुर्विवातिहृदयानिहरन्नराणांनीहारपातविग
मात्सुभगोवसंते २२ कुंदैःसविभ्रमवधूहसितावदातैःउद्योतितान्युपवनानिमनोहराणि। चित्तंमु

ऋत ११ नेरपिहरंतिनिहत्तरागंप्रागावरागमलिनानिमनांसियूनां।आलंबिहेमरसनाःस्तनसक्तहाराःकंद
र्पदर्पशिथिलीकृतगात्रयष्ट्यः।मासेमधौमधुरकोकिलभृंगनादैर्नार्योहरंतिहृदयंप्रसभं
नराणां।२४ नानामनोज्ञकुसुमितद्रुमपल्लवाढ्यान्हृष्टान्यपुष्टनिनदाकुलसानुदेशान्।शै
लेयजालपरिणद्धशिलातलौघान्दृष्ट्वाजनःक्षितिभृतोमुदमेतिसर्वः २५ नेत्रेनिमीलयति
तिरोदितियातिशोकंघ्राणंकरेणविरुणद्धिविरौतिचोच्चैः।कांताविप्रयोगपरिदेवितचित्तवृत्तिर्दृष्ट्वा
ध्वगःकुसुमितान्सहकारवृक्षान्।२६ समदमधुकराणांकोकिलानांचनादैःकुसुमितसह
कारैःकर्णिकारैश्चरम्यैः।इषुभिरिवसुतीक्ष्णैर्मानसंमानिनीनांतुदतिकुसुममासोमन्मथोद्दीपना
य॥२७ रुचिरकनककायांश्चुंबितंचूतपुष्पंद्रुपवनविधूतंचूतपुष्पंसुरम्यं॥अभिमुखमभि
वीक्ष्यक्षामदेहोपिमार्गेमदनशरपरीतोमोहमेतिप्रवासी॥२८ परभृतकुलगीतैश्चाद्रुमिलाद राम
पाभिःशितवदनमयूरपेऽकुरूपपुष्पप्रभाभिः।करकिसलयकांतैःपल्लवैर्विद्रुमाभैरभिभवतिवस ११